श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १०

### *सृष्टिभेदवर्णनम्*

वैकुण्ठ वर्धितबलोऽर्थ भवत्प्रसादा-
दम्भोजयोनिरसृजत् किल जीवदेहान्।
स्थास्नूनि भूरुहमयाणि तथा तिरश्चां
जातिर्मनुष्यनिवहानपि देवभेदान्॥ १ ॥

मिथ्याग्रहास्मिमतिरागविकोपभीति-
रज्ञानवृत्तिमिति पञ्चविधां स सृष्ट्वा।
उद्दामतामसपदार्थविधानदून-
स्तेने त्वदीय चरणस्मरणं विशुद्ध्यैः॥ २ ॥

तावत्ससर्ज मनसा सनकं सनन्दं
भूयस्सनातनमुनिं च सनत्कुमारम्।
ते सृष्टिकर्मणि तु तेन नियुज्यमानाः
त्वत्पादभक्तिरसिका जगृहुर्न वाणीम्॥ ३ ॥

तावत् प्रकोपमुदितं प्रतिरुन्धतोऽस्य
भ्रूमध्यतोऽजनि मृडो भवदेकदेशः।
नामानि मे कुरु पदानि च हा विरिञ्चे-
त्यादौ रुरोद किल तेन स रुद्रनामा॥ ४ ॥

एकादशाह्वयतया च विभिन्नरूपं
रुद्रं विधाय दयिता वनिताश्च दत्वा।
तावन्त्यदत्त च पदानि भवत्प्रणुन्नः
प्राह प्रजाविरचनाय च सादरं तम्॥ ५ ॥

रुद्राभिसृष्टभयदाकृतिरुद्रसङ्घ-
    सम्पूर्यमाणभुवनत्रयभीतचेताः।
मा मा प्रजाः सृज तपश्चर मङ्गळाये-
    त्याचाष्ट तं कमलभूर्भवदीरितात्मा॥ ६ ॥

तस्याथ सर्गरसिकस्य मरीचिरत्रिः
    तत्राङ्गिराः क्रतुमुनिः पुलहः पुलस्त्यः।
अङ्गादजायत भृगुश्च वसिष्ठदक्षौ
    श्रीनारदश्च भगवान् भवदङ्घ्रिदासः॥ ७ ॥

धर्मादिकानभिसृजन्नथ कर्दमं च
    वाणीं विधाय विधिरङ्गजसंकुलोऽभूत्।
त्वद्बोधितैस्सनकदक्षमुखैस्तनूजै-
    रुद्बोधितश्च विरराम तमो विमुञ्चन्॥ ८ ॥

वेदान् पुराणनिवहानपि सर्वविद्याः
    कुर्वन् निजाननगणाच्चतुराननोऽसौ।
पुत्रेषु तेषु विनिधाय स सर्गवृद्धि-
    मप्राप्नुवंस्तव पदाम्बुजमाश्रितोऽभूत्॥ ९ ॥

जानन्नुपायमथ देहमजो विभज्य
    स्त्रीपुंसभावमभजन्मनुतद्वधूभ्याम्।
ताभ्यां च मानुषकुलानि विवर्धयंस्त्वं
    गोविन्द मारुतपुरेश निरुन्धि रोगान्॥ १० ॥

**********